प्रातः - 06:55 दिनाङ्क :-12.01.2025

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः – दिव्यानन्द-झाः**

-

**अथ वार्ताः**

**प्रधानमन्त्री/युवदिवसः**

प्रधानमन्त्री नरेन्द्रमोदी अद्य राष्ट्रिय-युव-दिवसस्य अवसरे नवदिल्ल्यां भारतमण्डपे पञ्च-विंशत्यधिक-द्वि-सहस्र-तमाब्दीये विकसित-भारत-युव-नेतृ-संवादे त्रि-सहस्र-युवनेतृभिः सह संवादं करिष्यति। गतवासरे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् विकसित-भारत-युव-नेतृ-संवादः देशस्य यूनः राष्ट्रस्य विकासयात्रायां सम्मेलितुम् अद्वितीयः उपक्रमः अस्ति। श्रीमोदिना ह्यः युवकार्य-क्रीडा-राज्य-मन्त्रि-पदारूढया रक्षा-खडसे इत्यनया पञ्चविंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य राष्ट्रिय-युव-महोत्सवस्य विषये विकसित-भारत-युव-नेतृ-संवाद-विषये च लिखितः एकः लेखः प्रसारितः। प्रधानमन्त्री अवदत् यत् एषः कार्यक्रमः विकसित-भारतस्य दृष्टिं साकारीकर्तुं यूनां मस्तिष्कोर्जां, सृजनशीलतां नेतृत्वं च दिशां प्रदातुं प्रकल्पितः वर्तते। विकसित-भारत-युव-नेतृ-संवादस्य प्रथमे दिने केन्द्रीय-युव-कार्य-क्रीडा-मन्त्री डॉ.मनसुख-मांडविया अवोचत् यत् अयं कार्यक्रमः राजनीतिक-सम्पर्कं विना राजनीतौ एक-लक्ष-यूनः सम्मेलितुं प्रधानमन्त्रिणः स्वाधीनता-दिवसस्य आह्वानस्य अनुरूपः वर्तते। तेनोक्तं यत् युवभिः सह संवादस्य अनन्तरं सर्वकारेण विविध-सामाजिक-सेवा-कार्यक्रमाः आयोजयिष्यन्ते। सर्वकारः युवभ्यः राष्ट्रियम् अन्ताराष्ट्रियं च मञ्चं प्रदास्यति।

**भाजपा/प्रत्याशिसूची**

भारतीय-जनतापार्टीति-दलेन दिल्ली-विधानसभा-निर्वाचनार्थं प्रत्याशिनाम् अपरा सूची प्रकाशितास्ति। अत्र आहत्य ऊनत्रिंशत् प्रत्याशिनः सन्ति। इतः पूर्वं दलेन प्रथम-सूच्याम् ऊनत्रिंशत्-प्रत्याशिनां नामानि घोषितानि आसन्।

**दिल्ली-निर्वाचनम्**

दिल्ली-विधानसभा-निर्वाचनात् प्राक् आम-आदमी-पार्टीति-दलस्य भाजपेति-दलस्य च मध्ये आरोप-प्रत्यारोप-प्रकरणं सञ्जायते। भाजपा-दलेन आम-आदमी-पार्टीति-दलस्य नेतृत्व-युतस्य दिल्ली-सर्वकारस्य कथित-भ्रष्टाचार-विषयकं गीतं

प्रसारितम्। राजधान्यां नवदिल्ल्यां वार्ताहर-सम्मेलने प्रदेश-भाजपाध्यक्ष: वीरेन्द्र-सचदेवा आक्षिपत् यत् पूर्वमुख्यमत्रिणा अरविन्द-केजरीवालेन न केवलं दिल्ली-वासिभ्य: मिथ्यालाप: कृत:, अपितु नागरिकाणाम् अहितम् अपि कृतम्।

**सिङ्गापुरराष्ट्रपतेः भारतयात्रा**

सिङ्गापुरस्य राष्ट्रपतिः थर्मन्-षणमुगरत्नम् इत्येषः जनवरी-मासस्य चतुर्दशत: अष्टादश-दिनाङ्क-पर्यन्तं भारतस्य यात्रायां भविष्यति । दश-वर्षेषु कस्यापि सिङ्गापुर-राष्ट्रपतेः भारतस्य एषा प्रथमा आधिकारिकी यात्रा भविष्यति। षण्मुगरत्नस्य यात्रया सममेव भारत-सिङ्गापुरयोः कूटनीतिकसम्बन्धानां षष्टिवर्षाणि अपि पूरितानि भविष्यन्ति। यात्रावधौ सः राष्ट्रपतिना द्रौपदी-मुर्मुना प्रधानमन्त्रिणा नरेन्द्रमोदिना च सह मेलनं करिष्यति।

**ऋतु-सञ्चेतना**

सघन-कुज्झटिका-कारणात् उत्तर-पश्चिम-भारते आगामिदिनद्वयं यावत् विद्युद्गर्जनेन समं वृष्टेः सम्भावना अपि विद्यते। ऋतुविभागेन पश्चिम-विक्षोभ-कारणात् अद्यपर्यन्तम् उत्तर-पश्चिम-भारतस्य केषुचित् भागेषु वृष्टि-हिमपातयोः सम्भावनायाः पूर्वानुमान: कृत:। आकाशवाण्याः सह संवादावसरे ऋतुविभागस्य डॉ.सोमा-सेनः उक्तवती यत् उत्तरीय-क्षेत्रेषु अस्य मासस्य चतुर्दश-दिनाङ्कपर्यन्तं प्रातः रात्रौ च सघन-कुज्झटिकायाः स्थितिः भवितुं अर्हति। उपहिमालयीय-पश्चिमबङ्गे, सिक्किमे, बिहारे, ओडिशायां पूर्वोत्तरे च अद्यपर्यन्तम् एतादृश्यः एव परिस्थितयः भविष्यन्ति इति सम्भावना अस्ति। राष्ट्रिय-राजधान्यां सघन-कुज्झटिकाया: स्थितिमवलोक्य पीत-वर्णीय-सञ्चेतनापि प्रसारितास्ति।

**बैडमिण्टन्**

मलेशिया-ओपन्-बैडमिण्टन् प्रतिस्पर्धायां ह्य: पुरुष-युगल-वर्गे उपान्त्यचक्रे दक्षिण-क्रीडकयुगलेन भारतस्य सात्विक-साई-राज-रेंकी-रेड्डी चिरागशेट्टिनो: युगलं पराजितम्।

**॥इति वार्ता:॥**